# मम पुस्तकम्

नाम –

पत्रसङ्केतः –

चल-दूरवाणी-सङ्ख्या –




**वार्तालापाय**

१. अस्मिन् चित्रे किं किं दृश्यमानम् अस्ति ?

२. चित्रे के के किं किं कुर्वन्ति?

३. यथा चित्रे दृश्यते तथैव अस्माकं समीपे किम्-किम् अस्ति?

४. चित्रे कति आपणाः सन्ति ?


रीता
सौन्दर्यम्
डोसा
अन्ना डोसा
वैद्यः
आदिमः
दयाल-
संगीतवृन्दः
दयाल-
दयाल

# ३ अस्माकं जीवनशैली

**वयं ज्ञास्यामः**

| ओ | औ | झ | द | ल | ग | क | य |
|---|---|---|---|---|---|---|---|

- ५१ तः १००० पर्यन्तं संख्यानां परिचयम्।
- पठनं लेखनं च।
- एककं, दशकं सहस्रकं च इत्येतेषां समूहेषु गणनाम् (स्थानीय-मानम्)
- २ अङ्कीयानां सङ्ख्यानां सङ्कलनं व्यवकलनं च।
- १ अङ्कीयानां सङ्ख्यानां गुणनम्।
- १००-१०० सङ्ख्यानां समूहेषु गणनाम्।

## ■ पश्यन्तु, पठन्तु चर्चां च कुर्वन्तु -



वरयात्रिका:



क्रीडनकम्



वाद्ययन्त्रम्



गायिका

## ■ पठामः लिखामः च -

ओ




औ



ओष्ठः

औषधम्

ओ

औ

झ



झा



झरः

झालिः

झ

झा

झि



झी



झिल्लि-वाद्यानि

झीरुका

झि झी

द



दा



दन्ताः

दाडिमम्

द दा

**शिक्षक-निर्देशः** — सहभागिभ्यः एकैकस्य चित्रस्य परिचयं कारयेयुः। छात्राः चित्रस्य अधः लिखितानां शब्दानाम् उपरि अङ्गुलीं संस्थाप्य पठेयुः, तेभ्यः अक्षराणां लेखनं च कारयेयुः।

दि



दिनकरः

दी



दीपः

दि

दी

दौ




दौहित्रः

य



यज्ञः

दौ

य

ल



लशुनम्

ला



लावणिकम्

ल ला

लि



लिपिकः

ली



लीची-फलम्

लि ली

**शिक्षक-निर्देशः** — सहभागिभ्यः एकैकस्य चित्रस्य परिचयं कारयेयुः। छात्राः चित्रस्य अधः लिखितानां शब्दानाम् उपरि अङ्गुलीं संस्थाप्य पठेयुः, तेभ्यः अक्षराणां लेखनं च कारयेयुः।

**लो**



लोचनम्

**लौ**



लौहभाण्डः

लो लौ

**ग**



गर्दभः

**गा**



गायकः

ग गा

**शिक्षक-निर्देशः** — चित्रं दृष्ट्वा पठनाय सहभागिनां सहयोगं कुर्युः । तान् अक्षराणि च लेखयेयुः । चित्रेण सह सम्बद्धानां विषयाणाम् अपि ते चिन्तनं कथनं च कुर्युः ।

गि



गिरिः

गी




गीता

गि

गी

गो



गोमयम्

गौ



गौः

गो

गौ

क



का



कच्छपः

काकः

क

का

कि



की



किशोरः

कीटः

कि

की

**शिक्षक-निर्देशः** – स्वयमेव चित्रं दृष्ट्वा पठने सहभागिनां सहयोगं कुर्युः । अक्षराणि च लेखयेयुः ।

## ■ शब्दान् अन्विष्य लिखामः –

अद्य कमलः विविधप्रकारकं भोजनं निर्मितवान् । भोज्यवस्तूनां नामसु गोलाकारं कुर्वन्तु –



| | | | | | | |
|---|---|---|---|---|---|---|
| किलाटः | पलाण्डुः | तिन्त्रिणी | रक्ताङ्गम् | कंसः | तन्तुचक्रम् | अलावुः |
| स्थाली | चषकः | अवलेहः | आलुकम् | सूपः | ओदनम् | तुषारः |
| रोटिका | क्रीडनकम् | चित्रपतङ्गः | कटः | तक्रम् | लवणम् | जलम् |
| कलशः | वेल्लनी | तप्तकम् | पुष्पाधानी | पेषणी | पायसम् | |

## ■ भोज्यवस्तूनां नव नामानि लिखन्तु –

१. ____________

२. ____________

३. ____________

४. ____________

५. ____________

६. ____________

७. ____________

८. ____________

९. ____________

## पठामः लिखामः च -

- मालाकारेण माला निर्मिता ।

- बालकः कन्दुकेन क्रीडति ।

- आनन्दः ग्रामं गच्छति ।

- लता मधुरं गीतं गायति ।

**शिक्षक-निर्देशः**— शब्दानां पठने शिक्षार्थिनां साहाय्यं कुर्वन्तु । वाक्यानां पठनार्थं लेखनार्थं च शिक्षार्थिनः प्रेरणीयाः ।

# पुष्पमाला

पुष्पाणां मालानिर्माणे भानुः स्वमातुः सहायतां कुर्वन् आसीत् । सः मात्रे एकैकं पुष्पं ददाति स्म पुष्पसङ्ख्यां च वदति स्म । १० पुष्पाणाम् एका माला अर्थात् प्रत्येकस्यां मालायां दश पुष्पाणि । भानुः पुष्पाणि प्रयच्छति मालायाः निर्माणं च जायते । आगच्छन्तु मित्राणि ! वयम् आहत्य कति पुष्पाणि उपयुज्य एका माला निर्मिता भवति इति अवगच्छामः ।

| | | | | |
|---|---|---|---|---|
| पञ्च दशकानि  | + | **एक-एककम्**  | = | ५० + १ = ५१ एकपञ्चाशत् |
| पञ्च दशकानि  | + | **द्वे एकके**  | = | ५० + २ = ५२ द्विपञ्चाशत् |
| पञ्च दशकानि  | + | **त्रीणि एककानि**  | = | ५० + ३ = ५३ त्रिपञ्चाशत् |
| पञ्च दशकानि  | + | **चत्वारि एककानि**  | = | ५० + ४ = ५४ चतुःपञ्चाशत् |

| | | | | |
|---|---|---|---|---|
| पञ्च दशकानि  | + | पञ्च एककानि  | = | ५० + ५ = ५५ पञ्चपञ्चाशत् |
| पञ्च दशकानि  | + | षड् एककानि  | = | ५० + ६ = ५६ षड्पञ्चाशत् |
| पञ्च दशकानि  | + | सप्त एककानि  | = | ५० + ७ = ५७ सप्तपञ्चाशत् |
| पञ्च दशकानि  | + | अष्ट एककानि  | = | ५० + ८ = ५८ अष्टपञ्चाशत् |
| पञ्च दशकानि  | + | नव एककानि  | = | ५० + ९ = ५९ नवपञ्चाशत् |
| पञ्च दशकानि  | + | एकं दशकम्  | = | ५० + १० = ६० षष्टिः |

## एककानां दशकानां च सङ्कलनम् -

| | | |
|---|---|---|
| ६० + १ | = | ६१ |
| ६० + २ | = | ६२ |
| ६० + ३ | = | ६३ |
| ६० + ४ | = | ६४ |
| ६० + ५ | = | ६५ |
| ६० + ६ | = | ६६ |
| ६० + ७ | = | ६७ |
| ६० + ८ | = | ६८ |
| ६० + ९ | = | ६९ |
| ६० + १० | = | ७० |

| | | |
|---|---|---|
| ७० + १ | = | ७१ |
| ७० + २ | = | ७२ |
| ७० + ३ | = | ७३ |
| ७० + ४ | = | ७४ |
| ७० + ५ | = | ७५ |
| ७० + ६ | = | ७६ |
| ७० + ७ | = | ७७ |
| ७० + ८ | = | ७८ |
| ७० + ९ | = | ७९ |
| ७० + १० | = | ८० |

| | | |
|---|---|---|
| ८० + १ | = | ८१ |
| ८० + २ | = | ८२ |
| ८० + ३ | = | ८३ |
| ८० + ४ | = | ८४ |
| ८० + ५ | = | ८५ |
| ८० + ६ | = | ८६ |
| ८० + ७ | = | ८७ |
| ८० + ८ | = | ८८ |
| ८० + ९ | = | ८९ |
| ८० + १० | = | ९० |

| | | |
|---|---|---|
| ९० + १ | = | ९१ |
| ९० + २ | = | ९२ |
| ९० + ३ | = | ९३ |
| ९० + ४ | = | ९४ |
| ९० + ५ | = | ९५ |
| ९० + ६ | = | ९६ |
| ९० + ७ | = | ९७ |
| ९० + ८ | = | ९८ |
| ९० + ९ | = | ९९ |
| ९० + १० | = | १०० |

## रिक्तस्थानेषु क्रमेण सङ्ख्यां लिखन्तु –

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० |
| ११ | | १३ | १४ | | | १७ | | | २० |
| २१ | | | २४ | | | | | | |
| | | | | | ३६ | | | | |
| | | ४३ | | | | | | ४९ | |
| | ५२ | | | | ५६ | | | | |
| ६१ | | | ६४ | | | ६७ | | ६९ | |
| | | ७३ | | | | | | | ८० |
| | | | ८४ | | | | ८८ | | |
| ९१ | | ९३ | | | | ९७ | | | १०० |

## योजयाम:

| | | | |
|---|---|---|---|
| ७० | ५६ | ४६ | ६२ |
| + १२ | + १३ | + १२ | + ३६ |
| ____ | ____ | ____ | ____ |

- यदा एककानां योजनं दशाधिकं भवति तदा दश-एककानां दशकं निर्माय दशकानां योजनं कर्तव्यम् ।

यथा –

| |
|---|
| १ |
| ४६ |
| + २७ |
| ७३ |

६ एककानि + ७ एककानि आहत्य

१३ एककानि अर्थात् [१ दशकम्] [३ एककानि]

## योजयाम:

| | | | |
|---|---|---|---|
| ७५ | ३७ | ५५ | २८ |
| + १९ | + ४६ | + २६ | + २५ |
| ____ | ____ | ____ | ____ |
| ६५ | ३६ | ३८ | ३९ |
| + २७ | + ५४ | + ४५ | + २४ |
| ____ | ____ | ____ | ____ |

## व्यवकलनं कुर्मः -

| | | | |
|---|---|---|---|
| ७५ | ३८ | ८६ | ४७ |
| – २४ | – १२ | – २४ | – १३ |
| ____ | ____ | ____ | ____ |

यदा एककानि न्यूनानि भवन्ति, तदा वयं दशकानि एककेषु परिवर्तयामः -

यथा – ५४ [१०] [१०] [१०] [१०] [१०] 

अथवा

५४ [१०] [१०] [१०] [१०] 

यथा –

| | |
|---|---|
| ५४ | ४ १४ |
| - २६ | - २ ६ |
| २८ | ____ |

४ तः ६ सङ्ख्यायाः व्यवकलनम् अशक्यम्, अतः ५ दशकेषु १ दशकं स्वीकृत्य १० एककेषु परिवर्तनं कुर्मः । अधुना ४ दशकानि एवञ्च १४ एककानि सन्ति। १४ एककेषु ६ एककानि व्यवकलितानि तर्हि ८ एककानि अवशिष्टानि भविष्यन्ति।

४ दशकेषु २ दशकानि व्यवकलितानि तर्हि २ दशकानि अवशिष्टानि भविष्यन्ति।

## व्यवकलनं कुर्मः -

| | | | |
|---|---|---|---|
| ७६ | ५३ | ३२ | ६५ |
| – ३८ | – २७ | – १५ | – २८ |
| ____ | ____ | ____ | ____ |
| ९६ | ८८ | ४० | ५४ |
| – ६८ | – ३९ | – २७ | – २८ |
| ____ | ____ | ____ | ____ |

■ **स्वतन्त्रता-दिवसस्य अवसरे विद्यालये सर्वेभ्यः बालकेभ्यः मोदक-पेटिकायाः वितरणं सञ्जातम् । एकस्यां पेटिकायां केवलं चत्वारि मोदकानि स्थापयितुं शक्यन्ते । आयान्तु, अनुमानं कुर्मः यत् १० बालकेभ्यः मोदक-पेटिका दातव्या अस्ति, तर्हि कति मोदकानि अपेक्षितानि ?**

१ बालकाय  अर्थात् १ मोदक-पेटिका इत्युक्ते चत्वारि मोदकानि ।

१ वारम् ४

१ गुणितम् ४

अथवा १ × ४ = ४ मोदकानि ।

---

२ बालकाभ्यां  अर्थात् ४ मोदकानां २ द्वे मोदकपेटिके

४ + ४ (२ वारम् ४)

२ गुणितानि ४

अथवा २ × ४ = ८ मोदकानि ।

---

३ बालकेभ्यः  अर्थात् ४ मोदकानां ३ मोदकपेटिकाः

४ + ४ + ४ (३ वारम् ४)

३ गुणितानि ४

३×४ = १२ मोदकानि ।

---

४ बालकेभ्यः  अर्थात् ४ मोदकानां ४ पेटिकाः

४+४+४+४ (४ वारम् ४)

४ गुणितानि ४

४×४ = १६ मोदकानि ।

---

५ बालकेभ्यः  ४ मोदकानां ५ पेटिकाः

४+४+४+४+४ = ५ वारम् ४

५ × ४ = २० मोदकानि ।

---

वदन्तु, ७ बालकेभ्यः कति मोदकानि प्राप्यन्ते ?

४ + ____ + ____ + ____ + ____ + ____ + ____ = ____ वारम् ____

अथवा ____ गुणितम् ____ = ____ × ____ = ____ मोदकानि ।

## गुणनं कुर्मः -

| | | | |
|---|---|---|---|
| ५ | ४ | ५ | ३ |
| × ४ | × ३ | × ५ | × ४ |
| ____ | ____ | ____ | ____ |

## आगच्छन्तु, स्यूतान् गणयामः -

| | |
|---|---|
| १ पोटलिका १०० स्यूतानाम्  अथवा १ वारम् १०० अथवा | १×१००=१०० स्यूताः |
| २ पोटलिके १०० स्यूतानाम्  अथवा २ वारम् १०० अथवा | २×१००=२०० स्यूताः |
|  | ४ × १०० = ४०० स्यूताः |
|  | ५ × १०० = ५०० स्यूताः |
|  | ६ × १०० = ६०० स्यूताः |
|  | ७ × १०० = ७०० स्यूताः |
|  | ८ × १०० = ८०० स्यूताः |
|  | ९ × १०० = ९०० स्यूताः |
|  | १० × १०० = १००० स्यूताः |

## अभ्यास-कार्यम्

### १. प्रदत्तानाम् अक्षराणां सञ्ज्ञानं कृत्वा गोलाकारं कुर्मः ।

| | | | |
|---|---|---|---|
| ओ | – | ओदनम् | ओष्ठः |
| औ | – | औलूकम् | औषधम् |
| लो | – | लोचनम् | लौहः |

### २. चित्रे चित्रितानां वस्तूनां नामसु गोलाकारं कुर्मः ।



घटः

तुषारः

कूपी

नलिका

### ३. पठामः लिखामः च -

चषके जलम् अस्ति।

______________________________

### ४. चित्राणां नामानि लिखामः ।







______________ ______________ ______________

## ५. रिक्तस्थानं पूरयामः -

| | | | |
|---|---|---|---|
| पञ्च दशकानि  | एकम् एककम्  | = | ☐ + ☐ = ☐ |
| पञ्च दशकानि  | चत्वारि एककानि  | = | ☐ + ☐ = ☐ |

## ६. रिक्तस्थानेषु समुचितक्रमेण सङ्ख्याः लिखामः ।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| २१ | | | २४ | | | | २८ | | ३० |
| | | ३३ | | | ३६ | | | ३९ | |

## ७. रिक्तस्थानं पूरयामः ।

९० + २ = ____________

७० + ५ = ____________

```
   ४६        ५८
+  २७     –  २७
------    ------
------    ------
```

## ८. स्यूतान् गणयित्वा लिखामः ।

 = १०० स्यूताः




____________ स्यूताः




____________ स्यूताः